## प्रश्न–पत्रस्य अङ्कविभाजनपत्रम् (ब्लू–प्रिंट)
## उच्चमाध्यमिकछात्राणां कृते

कक्षा – दशमी (X) पूर्णाङ्काः – 100
विषयः – संस्कृतम् (विशिष्टम्) समयः – घण्टात्रयम्

| स. क्र. | इकाई | इकाई– अनुसारेण आवंटिताङ्काः | अङ्कानुसारं प्रश्नानां सङ्ख्या | | | | | | पूर्ण– प्रश्नाः |
|---|---|---|---|---|---|---|---|---|---|
| | | | 01 अङ्कः | 03 अङ्काः | 04 अङ्काः | 05 अङ्काः | 06 अङ्काः | 10 अङ्काः | |
| 01 | सन्धिः | 03 | 03 | – | – | – | – | – | 03 |
| 02 | समासः | 04 | 04 | – | – | – | – | – | 04 |
| 03 | अव्ययम् | 03 | 03 | – | – | – | – | – | 03 |
| 04 | धातुरूपाणि | 03 | 03 | – | – | – | – | – | 03 |
| 05 | शब्दरूपाणि | 03 | 03 | – | – | – | – | – | 03 |
| 06 | प्रत्ययः | 03 | 03 | – | – | – | – | – | 03 |
| 07 | पर्याय / विलोमचयनम् / विशेषण–विशेष्यम् | 04 | 04 | – | – | – | – | – | 04 |
| 08 | सूक्तिः | 02 | 02 | – | – | – | – | – | 02 |
| 09 | युग्ममेलनम् | 04 | – | – | 01 | – | – | – | 01 |
| 10 | एकपदेन प्रश्नोत्तराणि | 04 | – | – | 01 | – | – | – | 01 |
| 11 | एकवाक्येन् प्रश्नोत्तराणि | 06 | – | – | – | – | 01 | – | 01 |
| 12 | कारकप्रयोगः | 05 | – | – | – | 01 | – | – | 01 |
| 13 | रिक्तस्थानपूर्तिः | 04 | – | – | 01 | – | – | – | 01 |
| 14 | सुभाषितम् | 04 | – | – | 01 | – | – | – | 01 |
| 15 | वाच्यपरिवर्तनम् | 03 | – | 01 | – | – | – | – | 01 |
| 16 | रस–छन्द–अलङ्कारपरिचयः | 06 | – | – | – | – | 01 | – | 01 |
| 17 | संस्कृतसाहित्यपरिचयः / कविपरिचयः | 04 | – | – | 01 | – | – | – | 01 |
| 18 | गद्यम् | 08 | – | – | 02 | – | – | – | 02 |
| 19 | पद्यम् | 08 | – | – | 02 | – | – | – | 02 |
| 20 | अपठितांशः | 05 | – | – | – | 01 | – | – | 01 |
| 21 | पत्रम् | 04 | – | – | 01 | – | – | – | 01 |
| 22 | निबन्धलेखनम् | 10 | – | – | – | – | – | 01 | 01 |
| | **पूर्णयोगः** | **100** | **25** | **01** | **10** | **02** | **02** | **01** | **41** |

निर्देशः – प्रश्नपत्रे प्रायः विंशतिः प्रश्नाः भविष्यन्ति। प्रश्नेषु उपप्रश्नाः अपि विधेयाः।
पञ्चविंशतिः अङ्कानाम् वस्तुनिष्ठप्रश्नाः अनिवार्याः भविष्यन्ति।

## प्रादर्श – प्रश्नपत्रम्
## कक्षा–दशमी (X)
## विषयः संस्कृतम् (विशिष्टम्)

समयः – घण्टात्रयम् पूर्णाङ्काः –100

**निर्देश – सर्वेप्रश्नाः अनिवार्याः सन्ति ! प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।**

**प्र. 1 उचितविकल्पं चित्वा लिखत –** 1 x 7

(क) गुरूपदेशः इत्यत्र सन्धिः अस्ति–

(अ) गुणसन्धिः (ब) यण् सन्धिः

(स) दीर्घसन्धिः (द) वृद्धिसन्धिः

(ख) 'नमस्ते' इत्यस्य सन्धिविच्छेदः अस्ति–

(अ) न+मस्ते (ब) नम+स्ते

(स) नमस्+ते (द) नमः+ते

(ग) 'जगदीशः' पदे सन्धिः अस्ति–

(अ) दीर्घसन्धिः (ब) व्यञ्जनसन्धिः

(स) विसर्गसन्धिः (द) यण्सन्धिः

(घ) 'दीनदानम्'' इत्यत्र समासः अस्ति

(अ) तत्पुरूषः (ब) बहुब्रीहिः

(स) द्विगुः (द) कर्मधारयः

(ङ) 'त्रिभुवनम्' इत्यस्य समासविग्रहः अस्ति

(अ) त्रीणि भुवनानि (ब) त्रिभुवनानि

(स) त्रयाणां भुवनानां समाहारः (द) त्रिभुवनम्

(च) 'चन्द्रशेखरः' इत्यत्र समासः अस्ति

(अ) कर्मधारयः (ब) बहुब्रीहिः

(स) तत्पुरूषः (द) द्वन्द्वः

(छ) 'पितरौ' इत्यस्य समासविग्रहः अस्ति–

(अ) माता च पिता च (ब) पिता च पिता च

(स)माता पिता (द) पितृ

**प्रशन2 (क) अधोलिखितेषु अव्ययम् अस्ति** 1 x 3

(अ) पत्रम् (ब) यानम्

(स) पुस्तकम् (द) कदा

(ख) 'अधिकारः' पदे उपसर्गः अस्ति

(अ) अधिक (ब)अधि

(स) अ (द) कारः

(ग) 'विद्या माता इव रक्षति' अस्मिन् वाक्ये अव्ययम् अस्ति–

(अ) विद्या (ब) रक्षति

(स)इव (द) माता

**प्रशन3 (क) 'प्रक्ष्यति' इत्यत्र धातुः अस्ति–** 1 x 3

(अ) प्रक्ष् (ब) प्रच्छ्

(स) प्रक्ष्य (द) पृच्छ्

(ख) 'इच्छेत्' इत्यत्र लकारः अस्ति–

(अ) लट्लकारः (ब) लृट्लकारः

(स) विधिलिङ्लकारः (द) लङ्लकारः

(ग) 'लिखतु' इत्यत्र लकारः अस्ति

(अ) लट्लकारः (ब) लोट्लकारः

(स) लृटलकारः (द) लङ्लकारः

**प्रश्न 4 (क) 'दध्ना' इत्यत्र विभक्तिः अस्ति** 1 x 3

(अ) द्वितीया (ब) पञ्चमी

(स) चतुर्थी (द) तृतीया

(ख) अधोलिखितेषु चतुर्थी अस्ति–

(अ) मात्रा (ब) मात्रे

(स) मातुः (द) मातरि

(ग) 'मधुषु' इत्यत्र विभक्तिः अस्ति

(अ) पञ्चमी (ब) चतुर्थी

(स) सप्तमी (द) द्वितीया

**प्रश्न 5– (क) 'बाला' इत्यत्र प्रत्ययः अस्ति** 1 x 3

(अ) टाप् (ब) क्त

(स) ङीप (द) क्त्वा

(ख) अधोलिखितेषु 'मतुप्' प्रत्ययः अस्ति–

(अ) गतवान् (ब) गतः

(स) गुणवान् (द) गत्वा

(ग) 'खदितवान्' पदे प्रत्ययः अस्ति–

(अ) तवान् (ब) क्तवतु

(स) इतवान् (द) खाद्

प्रश्न 6 **(क) 'भानुः' इत्यस्य पर्यायशब्दः अस्ति–** 1 x 6

(अ) सूर्यः (ब) सरिता

(स) चन्द्रः (द) गगनम्

(ख) 'वारि' इत्यस्य पर्यायशब्दः अस्ति –

(अ) वायुः (ब) अग्निः

(स) जलम् (द) नक्षत्रम्

(ग) 'तत' इत्यस्य विलोमशब्दः अस्ति –

(अ) सः (ब) तानि

(स) एषः (द) एतत्

(घ) 'उत्तमं वस्त्रम्' इत्यत्र विशेषणम् अस्ति –

(अ) वस्त्रम् (ब) उत्तमं

(ङ) उष्णो दहति ....................शीतः कृष्णायते करम्।

(अ) चाङ्गारः (ब) श्रृङ्गारः

(च) अङ्गीकृतं सुकृतिनः ..........................।

(अ) पालयन्ति (ब) परिपालयन्ति

**प्रशन 7 युग्ममेलनं कुरूत–** 1 x 4

| | अ | आ |
|---|---|---|
| क | शं नः पर्वताः | मुञ्जः |
| ख | अमात्याधमः | यमाः |
| ग | राजाधमः | ध्रुवयो भवन्तु |
| घ | दश | वत्सराजः |

**प्रशन 8 अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत–** **4**

(क) सिन्धवः कीदृशाः सन्तु?

(ख) कुलं केन रक्ष्यते ?

(ग) भारतमेदिनी कैः पीतदुकूलयुता ?

(घ) का गन्धवती ?

**प्रशन 9 अधोलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत** **6**

(क) मे मनः कथम् अस्तु ?

(ख) अरून्धत्याः विवाहः केन सह अभवत् ?

(ग) कानि पञ्चमहाभूतानि ?

**प्रशन 10 अधोलिखितगद्यांशौ पठित्वा प्रश्नानाम् उत्तराणि लिखत–** 2 x 4

(क) आदौ धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वृद्धत्वे भोज इति पुत्रः समजनि। स यदा पञ्चवार्षिकस्तदा पिता आत्मनो जरां ज्ञात्वा मुख्यामात्यानाहूय अनुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं वीक्ष्य विचारयामास–'यद्यहं राजलक्ष्मीभारधारणसमर्थं सोदरमपहाय राज्यं पुत्राय प्रयच्छामि तदा लोकापवादः। अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति। तदा दत्तमपि राज्यं वृथा, पुत्रहानिर्वंशोच्छेदश्च, इत्येवं विचार्य राज्यं मुञ्जाय दत्वा तदुत्सङ्गे भोजमात्मजं ददौ।

(क) कुत्र सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत् ?

(ख) सिन्धुलस्य अनुजः कः ?

(ग) सिन्धुलः भोजमात्मजं कस्य उत्सङ्गे ददौ ?

(घ) सिन्धुलः राज्यं कस्मै प्रदत्तवान् ?

(ख) उर्वशीमैत्रावरूणयोः पुत्रः वशिष्ठः। किन्तु पौराणिककथानुसारं वशिष्ठः ब्रह्मदेवस्य दशमानसपुत्रेषु एव एकः इति उल्लेखः अपि प्रसिद्धः। विपाशानद्याः तीरे वशिष्ठः तपः कृतवान्। यस्याः शिलायाः उपरि सः उपविष्टवान् सा शिला 'वशिष्ठशिला' इति उच्यते। तदनन्तरं सः भारतभ्रमणं कृतवान्। भारतभ्रमणसमये सः सावित्र्याः आश्रमं गतवान्। तत्र अतिदिकश्यपयोः कन्याम् अरून्धतीं दृष्ट्वा वशिष्ठः प्रभावितः अभवत्।

(क) कस्याः तीरे वशिष्ठः तपः कृतवान् ?

(ख) वशिष्ठः कस्याः आश्रमं गतवान् ?

(ग) कयोः पुत्रः वशिष्ठः ?

(ध) तदनन्तरं कः भारतभ्रमणं कृतवान् ?

**प्रशन 11 अधोलिखितपद्यांशौ पठित्वा प्रश्नानाम् उत्तराणि लिखत–** 2 x 4

(क) विद्यातीर्थे जगति विबुधाः साधवः सत्यतीर्थे,
गङ्गातीर्थे मलिनमनसो, योगिनो ध्यानतीर्थे।

धरातीर्थे धरणिपतयो दानतीर्थे धनाढ्याः,

लज्जातीर्थे कुलयुवतयः पातकं क्षालयन्ते।।

(क) योगिनः कुत्र पातकं क्षालयन्ते?

(ख) धरणिपतयः कुत्र पातकं क्षालयन्ते?

(ग) लज्जातीर्थे काः पातकं क्षालयन्ते ?

(घ) विद्यातीर्थे के पातकं क्षालयन्ते ?

(ख) प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।

द्वौ पुत्रौ तु महावीयौ धर्मज्ञौ कथितौ तव

(क) मनोः कौ द्वौ पुत्रौ ?

(ख) द्वौ पुत्रौ कीदृशौ ?

(ग) ''प्रियव्रतोत्तानपादौ'' इत्यत्र कः समासः ?

(घ) 'पुत्रौ' इत्यत्र किं वचनम् अस्ति ?

**प्रश्न 12 प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरूत–** 4

(गन्धः, शीतलछायां, पिपासायाः, जय)

(क) अन्तो नास्ति ................................।

(ख) घ्राणग्राह्यो गुणः ........................।

(ग) .............................भारतमेदिनि विश्वनुते।

(घ) वृक्षाः ..................... प्रयच्छन्ति ।

**प्रश्न 13 – प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत –** 4

**प्रश्न 14– निर्देशानुसारं वाच्यपरिवर्तनं कुरूत –** 3

(क) छात्रः पाठं पठति – (कर्मवाच्ये)

(ख) मोहनेन विद्यालयः गम्यते– (कर्तृवाच्ये)

(ग) सुधीरः शेते – (भाववाच्ये)

**प्रश्न15** (क) श्रृङ्गाररसस्य अनुभावान् लिखत– 2 x 3

(ख) छन्दसः प्रकारौ लिखत –

(ग)''अनुप्रास'' अलङ्कारस्य परिभाषां लिखत –

**प्रशन 16 (क) अधोलिखितेषु एकस्य सड़ि.क्षप्तं साहित्यिकं परिचयं लिखत –** 2 x 2

(क) पुराणानि (ख) महाभारतम् (ग) रामायणम्

**(ख) अधोलिखितेषु एकस्य कवेः सङ्क्षिप्तपरिचयं लिखत–**

(क) भवभूतिः (ख) दण्डी (ग) कालिदासः

**प्रशन 17 पञ्च– अशुद्धकारकवाक्यानां शुद्धिः करणीया– 5**

(क) ग्रामाय बहिः उद्यानम् अस्ति–

(ख) विद्यालयात् पुरतः क्रीडाङ्गणम् अस्ति–

(ग) अनूपः लेखनेन प्रवीणः –

(घ) बालकः सिंहेन विभेति –

(ङ) पीयूषः गृहकार्याणाम् कुशलः अस्ति –

**प्रशन 18 अधोलिखित– अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5**

शरीरं धर्मस्य प्रथमं साधनम् अस्ति 'शरीरमाद्यं खलु धर्मसाधनम्। शरीरस्य आरोग्यं व्यायामेन सिध्यति। यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति। व्यायामेन शरीरे शुद्धरक्तसञ्चारः भवति। इन्द्रियाणि स्वस्थानि च भवन्ति। जठराग्निः दीप्तः भवति। अतः व्यायामः अवश्यमेव करणीयः।

(क) धर्मस्य प्रथमं साधनं किम् ?

(ख) व्यायामेन जठराग्निः कीदृशः भवति ?

(ग) शरीरस्य आरोग्यं केन सिद्धयति ?

(घ) व्यायामेन इन्द्रियाणि कीदृशानि भवन्ति ?

(ङ) अपठितांशस्य उचितं शीर्षकं लिखत –

**प्रशन19– स्वस्य प्राचार्यस्य कृते त्रिदिवसानाम् अवकाशार्थं प्रार्थनापत्रं लिखत– 4**

**अथवा**

**भगिन्याः विवाहे आमन्त्रयितुं मित्राय पत्रं लिखत–**

**प्रश्न 20 अधोलिखितेषु एकस्मिन् विषये पञ्चसप्ततिशब्देषु संस्कृते निबन्धं लिखत– 10**

(क) उपमा कालिदासस्य

(ख) धन्या भारतवसुन्धरा

(ग) उद्यमेन हि सिध्यन्ति

(घ) मानो हि महतां धनम्

**प्रादर्श – उत्तरपत्रम्**
**कक्षा –दशमी (X)**
**विषय – संस्कृतम् (विशिष्टम्)**

समयः – घण्टात्रयम् पूर्णाङ्काः –100

**उत्तरम्–1**

(क) – (स) दीर्घसन्धिः
(ख) – (द) नमः+ते
(ग) – (ब) व्यञ्जनसन्धिः
(घ) – (अ) तत्पुरुषः
(ङ) – (स) त्रयाणां भुवनानां समाहारः
(च) – (ब) बहुब्रीहिः
(छ) – (अ) माता च पिता च

**उत्तरम्–2**

(क) – (द) कदा
(ख) – (ब) अधि
(ग) – (स) इव

**उत्तरम्–3**

(क) – (ब) प्रच्छ्
(ख) – (स) विधिलिङ्लकारः
(ग) – (ब) लोट्लकारः

**उत्तरम्–4**

(क) – (द) तृतीया
(ख) – (ब) मात्रे
(ग) – (स) सप्तमी

**उत्तरम्–5**

(क) – (अ) टाप्
(ख) – (स) गुणवान्
(ग) – (ब) क्तवतु

**उत्तरम्–6**

(क) – (अ) सूर्यः
(ख) – (स) जलम्
(ग) – (द) एतत्
(घ) – (ब) उत्तमम्
(ङ) – (अ) चाङ्गारः
(च) – (ब) परिपालयन्ति

**उत्तरम् –7**

| | (अ) | (आ) |
|---|---|---|
| (क) | शं नः पर्वताः | ध्रुवयो भवन्तु |
| (ख) | अमात्याधमः | वत्सराजः |
| (ग) | राजाधमः | मुञ्जः |
| (घ) | दश | यमाः |

**उत्तरम् –8** एकपदेन उत्तराणि –
(क) सन्त्वापः ।
(ख) शीलेन ।
(ग) नवसर्षपैः ।
(घ) पृथिवी ।

**उत्तरम्–9**
(क) मे मनः शिवसङ्कल्पमस्तु।
(ख) अरून्धत्याः विवाहः वशिष्ठेन सह जातः ।
(ग) पृथिवी आपः तेजः वायुः आकाशं च एतानि पञ्चमहाभूतानि ।

**उत्तरम्–10 (क)**
(क) धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत्।
(ख) सिन्धुलस्य अनुजः मुञ्जः ।
(ग) सिन्धुलः भोजमात्माजं अनुजस्य उत्सङ्गे ददौ ।
(घ) सिन्धुलः राज्यं मुञ्जाय प्रदत्तवान् ।

**उत्तरम्–10(ख)**
(क) विपाशानद्याः तीरे वशिष्ठः तपः कृतवान् ।
(ख) वशिष्ठः सावित्र्याः आश्रमं गतवान् ।
(ग) उर्वशीमैत्रावरूणयोः पुत्रः वशिष्ठ ।
(घ) तदनन्तरं वशिष्ठः भारतभ्रमणं कृतवान्।

**उत्तरम्–11 (क)**
(क) योगिनः ध्यानतीर्थ पातकं क्षालयन्ते ।

(ख) धरणिपतयः धरातीर्थे पातकं क्षालयन्ते ।
(ग) लज्जातीर्थे कुलयुवतयः पातकं क्षालयन्ते।
(घ) विद्यातीर्थे विबुधाः पातकं क्षालयन्ते ।

**उत्तरम्– 11 (ख)**

(क) मनोः प्रियव्रतोत्तानपादौ द्वौ पुत्रौ ।
(ख) द्वौ पुत्रौ धर्मज्ञौ महावीर्यौ च ।
(ग) द्वन्द्वसमासः।
(घ) द्विवचनम्।

**उत्तरम्–12**

(क) पिपासायाः।
(ख) गन्धः।
(ग) जय।
(घ) शीतलछायां।

**उत्तरम्–13**

(क) प्रत्येकशुद्धसुभाषितस्य कृते अङ्कद्वयं निर्धारितम्।

**उत्तरम्–14**

(क) छात्रेण पाठः पठ्यते ।
(ख) मोहनः विद्यालयं गच्छति ।
(ग) सुधीरेण शीयते ।

**उत्तरम्–15**

(क) स्मितवदन–मधुरकथन–भ्रूक्षेप–कटाक्षादयः श्रृङ्गारस्य अनुभावाः ।
(ख) छन्दसः प्रकारद्वयं मात्रिकं वर्णिकं च ।
(ग) 'वर्णसाम्यमनुप्रासः' वर्णानां साम्यम् अर्थात् वर्णसादृश्यम् अनुप्रासः।

**उत्तरम्–16**

(क) सम्पूर्णशुद्धपरिचयस्य कृते द्वौ अङ्कौ प्रदेयौ।
(ख) कवेः परिचयं रचनादिकं च दृष्ट्वा द्वौ अङ्कौ प्रदेयौ।

**उत्तरम्–17**

(क) ग्रामात् बहिः उद्यानम् अस्ति।
(ख) विद्यालयस्य पुरतः क्रीडाङ्गणम् अस्ति।
(ग) अनूपः लेखने प्रवीणः।
(घ) बालकः सिंहात् विभेति।

**उत्तरम्–18**

(क) धर्मस्य प्रथमं साधनं शरीरम् अस्ति ।

(ख) व्यायामेन जठराग्निः दीप्तः भवति।

(ग) शरीरस्य आरोग्यं व्यायामेन सिध्यति।

(घ) व्यायामेन इन्द्रियाणि स्वस्थानि भवन्ति।

(ङ) व्यायामः।

उत्तरम्–19 पत्रे सङ्केतं, सम्बोधनं दिनाङ्कादिकं च दृष्ट्वा शुद्धपत्रस्य कृते चत्वारः अङ्काः प्रदानीयाः।

उत्तरम्–20 सम्पूर्णशुद्धनिबन्धस्य कृते दश–अङ्काः प्रदेयाः।